# Shiva Artikyam 2

# શિવાર્તિક્યમ્ ૨

## Document Information

Text title : Shiva Artikyam 2

File name : shivArtikyam2.itx

Category : shiva, moropanta, AratI

Location : doc_shiva

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# Shiva Artikyam 2

# શિવાર્તિક્યમ્ ૨

(*)

ગૌરીકાન્તં નૌમિ સદા નિર્જરદાન્તં । ધ્રુવ૦ ॥

કામારાતિં પાવકભાલં જનપાલં
માયાલીલં ચન્દ્રકલારઞ્જિતમૌલિં
યોગાતીતં યોગિભિરન્તઃસ્તુતિગીતમ્ । ગૌરી૦ ॥ ૧ ॥

ગઙ્ગામાલં દાનવકાલં મુનિપાલં
દેવાધીશં વ્યાલકુલાલઙ્કૃતવેષં
ક્ષોણીનાથં વારણચાર્માંમ્બરકાયમ્ । ગૌરી૦ ॥ ૨ ॥

નાનાવાદ્યૈસ્તાણ્ડવકાલે સુરસઙ્ઘૈઃ
નાગાદ્યૈઃ સામકલાભિસ્તુતિપૂજ્યૈઃ
સર્વોપાયં વારણદત્તામ્બરકાયમ્ । ગૌરી૦ ॥ ૩ ॥

નાનારૂપૈ . . . . . નાનાભુવનાનિ
સૂક્ષ્માસૂક્ષ્મૈઃ સ્થૂલતરાસ્થૂલતરૈઃ ।
લાલિતપાલિતદીનં દિનદશપાલમ્ । ગૌરી૦ ॥ ૪ ॥

પાશબાણૈઃ સંયુતં ખેલન્તમનન્તં
દીક્ષાભઙ્ગં દક્ષિણકાન્તં કૃતવન્તં
વેદૈઃ શાસ્ત્રૈર્વન્દિતપાદં સુરમોદમ્ । ગૌરી૦ ॥ ૫ ॥

ક્ષોણીપાલં વારિમયં ત . . . . . ।
તેજોરૂપં ચન્દ્રમયં સૂર્યમયં ચાર્કં
તારામાર્ગૈઃ સોમકલાક્ષં ત્રિપુરાન્તમ્ । ગૌરી૦ ॥ ૬ ॥

ભૂતાનન્દં મર્દિતભસ્માસુરકન્દં
વારાણસ્યા સેવિતવિશ્વેશ્વરપાદં
યન્ત્રૈસ્તીર્થૈર્મન્ત્રૈઃ પરૈર્માનસગીતમ્ । ગૌરી૦ ॥ ૭ ॥

પ્રાતઃકાલે શઙ્કરમાલારુચિ . . મેતં
* અસ્ય મયૂરકૃતિત્વે સન્દેગ્ધિ નશ્ચેતઃ ।
રામાનન્દે જલ્પતિ કાન્તં રમણીયં
ભુક્ત્વાભોગં વચ્ચતિ યોગાઙ્કિતગમ્યં
સ્નાનં શમ્ભો મત્તમયૂરેશ્વરવૃન્દમ્ । ગૌરી૦॥ ૮॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતં શિવાર્તિક્યં સમ્પૂર્ણમ્ ।
નેદં કવિલિખિતે ગ્રન્થસમૂહે સમુલભ્યતે ન વાન્યૈરપિ તત્સમકાલિકૈઃ કુત્રાપિ નિર્દિશ્યતે । પ્રાયશ્ચાશુદ્ધં ચ ત્રુટિતં ચ યથા કાવ્યસઙ્ગ્રહે મુદ્રિતં તથૈવાસ્માભિઃ ।

Proofread by Rajesh Thyagarajan

---

*Shiva Artikyam 2*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*